# वैयाकरणसिद्धान्तकौमुदी

## विसर्गसन्धिप्रकरणम् (२)

१९.११.२०१०

# पुनरावर्तनम्

- खरवसानयोः विसर्जनीयः
- विसर्जनीयस्य सः - विष्णुस्त्राता
- शर्परे विसर्जनीयः – घनाघनः क्षोभणः
- वा शरि – हरिः शेते / हरिश्शेते
- खर्परे शरि वा विसर्गलोपो वक्तव्यः – राम स्थाता / रामः स्थाता / रामस्स्थाता

# १४२. 'कुप्वो ≍क≍पौ च' (८.३.३७)

- पदत्रयम् । कुप्वोः, ≍क≍पौ, च । 'विसर्जनीयस्य सः' इत्यतः 'विसर्जनीयस्य' इति अनुवर्तते ।
- विसर्जनीयस्य – षष्ठी = विसर्गस्य स्थाने
- कुप्वोः – सप्तमी = कवर्गे पवर्गे च परे
- ≍क≍पौ – प्रथमा = जिह्वामूलीय-उपध्मानीयौ भवतः
- च = विसर्गः च
- कवर्गे पवर्गे च परे विसर्जनीयस्य क्रमात् जिह्वामूलीय-उपध्मानीयौ स्तः । चाद्विसर्गः ।

- कः + करोति = कᳵकरोति / कः करोति
- कः + खनति = कᳵखनति / कः खनति
- कः + पचति = कᳶपचति / कः पचति
- कः + फलति = कᳶफलति / कः फलति

# १५२. सोऽपदादौ (८.३.३८)

- पदद्वयम् । सः, अपदादौ ।
- 'विसर्जनीयस्य सः' (८.३.३४) इत्यतः 'विसर्जनीयस्य' इति, ' कुप्वो ᳲकᳲपौ च' (८.३.३७) इत्यतः 'कुप्वोः' इति च अनुवर्तते ।
- अपदादौ कुप्वोः – सप्तमी = पदादौ अविद्यमानयोः कवर्ग-पवर्गयोः परयोः
- विसर्जनीयस्य – षष्ठी = विसर्गस्य स्थाने
- सः – प्रथमा = सकारः स्यात्
- विसर्जनीयस्य सः स्याद् अपदाद्योः कुप्वोः परयोः ।

# पाश-कल्प-क-काम्येष्विति वाच्यम् (वा)

- एतेषु परेषु 'सोऽपदादौ' इति विसर्गः प्रवर्तते ।
- पयः + पाशम् (कुत्सितं पयः इत्यर्थे 'याप्ये पाशप्' (५.३.४७) इति पाशप् प्रत्ययः) = पयस्पाशम्
- यशः + कल्पम् (ईषदसमाप्तं यशः इत्यर्थे 'ईषदसमाप्तौ कल्पप्' (५.३.६७) इति कल्पप् प्रत्ययः) = यशस्कल्पम्
- यशः + कम् (अज्ञातं यशः, अथ वा कुत्सितं यशः इत्यर्थे 'अज्ञाते'(५.३.७३), 'कुत्सिते' (५.३.७४) इति कप्रत्ययः) = यशस्कम्
- यशः + काम्यति (यशः आत्मनः इच्छति इत्यर्थे 'काम्यच्च' (३.१.९) इति काम्यच् प्रत्ययः) = यशस्काम्यति

# अनव्ययस्येति वाच्यम् (वा)

- ’सोऽपदादौ’ इति विधिः अव्ययस्थस्य विसर्गस्य न भवति ।
- प्रातः + कल्पम् = प्रात⌢कल्पम् / प्रातःकल्पम्

# काम्ये रोरेवेति वाच्यम् (वा)

- काम्यच्प्रत्यये परे रुस्थानिकस्यैव विसर्गस्य 'सोऽपदादौ' इति विधिः भवति ।
- विसर्गोत्पत्तिः द्विधा –

1. सकारस्य 'ससजुषो रुः' इति रुत्वम्, तस्य 'खरवसानयोः विसर्जनीयः' इति विसर्गः ।उदा: रामः , धनुः ।
2. स्वयं रेफान्तानां पदानां 'खरवसानयोः..' इति विसर्गः । उदाः पुनः, गीः ।

- गीः+ काम्यति = गी॒काम्यति / गीः काम्यति ।

# १५३. इणः षः (८.३.३९)

- पदद्वयम् ।
- 'विसर्जनीयस्य सः' (८.३.३४) इत्यतः 'विसर्जनीयस्य' इति, ' कुप्वो ⌒क⌒पौ च' (८.३.३७) इत्यतः 'कुप्वोः' इति, 'सोऽपदादौ' (८.३.३८) इति च अनुवर्तते ।
- इणः – पञ्चमी = इणः परस्य
- विसर्जनीयस्य – षष्ठी = विसर्गस्य स्थाने
- अपदादौ कुप्वोः – सप्तमी = पदादौ अविद्यमानयोः कुप्वोः परयोः
- षः – प्रथमा = षकारादेशः स्यात्
- इणः परस्य विसर्गस्य षकारः स्यात् पूर्वविषये ।

- सर्पिः + पाशम् = सर्पिष्पाशम् ।
- सर्पिः + कल्पम् = सर्पिष्कल्पम् ।
- सर्पिः + कम् = सर्पिष्कम् ।
- सर्पिः + काम्यति = सर्पिष्काम्यति ।
- अत्रापि 'पाश-कल्प-क-काम्येष्विति वाच्यम्', 'अनव्ययस्येति वाच्यम्', 'काम्ये रोरेवेति वाच्यम्; इति वार्तिकानि सम्बध्यन्ते ।
- उच्चैः + कल्पम् = उच्चैᳲकल्पम् / उच्चैःकल्पम् ।
- गीः + काम्यति = गीᳲकाम्यति / गीःकाम्यति ।

# १५४. नमस्पुरसोर्गत्योः (८.३.४०)

- पदद्वयम् । नमस्-पुरसोः, गत्योः ।
- 'विसर्जनीयस्य सः' (८.३.३४) इत्यतः 'विसर्जनीयस्य' इति, ' कुप्वो ≍क≍पौ च' (८.३.३७) इत्यतः 'कुप्वोः' इति, 'सोऽपदादौ' (८.३.३८) इत्यतः 'सः' च अनुवर्तते ।
- गत्योः – षष्ठी = गतिसंज्ञकयोः
- नमस्पुरसोः – षष्ठी = नमस्, पुरस् – इत्येतयोः अव्यययोः
- विसर्जनीयस्य – षष्ठी = विसर्गस्य स्थाने
- कुप्वोः – सप्तमी = कुप्वोः परयोः
- सः – प्रथमा = सकारादेशः स्यात्
- गतिसंज्ञायोः अनयोः विसर्गस्य सः स्यात् कुप्वोः परयोः ।

- गतिश्च (१.४.६०)
- विभाषा कृञि (१.४.७२)
- साक्षात्प्रभृतीनि च (१.४.७४)
- साक्षात्प्रभृतीनि कृञ्-धातौ परे विकल्पेन गतिसंज्ञाः स्युः । साक्षात्प्रभृतिषु नमस् इत्यस्य पाठोऽस्ति ।
- नमः + करोति = नमस्करोति ।
- साक्षात्प्रभृतित्वात् कृञो योगे विभाषा गतिसंज्ञा । तद्भावे – नम॒करोति/नमः करोति ।

☙ पुरोऽव्ययम् (१.४.६७) इति नित्यं गतिसंज्ञा ।

☙ पुरः + करोति = पुरस्करोति ।

☙ अगतित्वान्नेह । पूः पुरौ पुरः प्रवेष्टव्याः ।

# १५५. इदुदुपधस्य चाप्रत्ययस्य (८.३.४१)

- पदत्रयम् । इदुदुपधस्य, च, अप्रत्ययस्य ।
- 'विसर्जनीयस्य सः' (८.३.३४) इत्यतः 'विसर्जनीयस्य' इति, ' कुप्वो ꣹क꣹पौ च' (८.३.३७) इत्यतः 'कुप्वोः' इति, 'इणः षः' (८.३.३९) इत्यतः 'षः' इति च अनुवर्तते ।
- इदुदुपधस्य – षष्ठी = इकार-उकारोपधस्य [अलोऽन्त्यात्पूर्व उपधा]
- अप्रत्ययस्य – षष्ठी = प्रत्ययावयवभिन्नस्य
- विसर्जनीयस्य – षष्ठी = विसर्गस्य स्थाने
- षः – प्रथमा = षकारादेशः स्यात्
- इकारोकारोपधस्य अप्रत्ययस्य विसर्गस्य षः स्यात् कुप्वोः ।

- निः + प्रत्यूहम् = निष्प्रत्यूहम् [निस्/निर् इति अव्यये]
- आविः + कृतम् = आविष्कृतम् [आविर् इति अव्ययम्]
- दुः + कृतम् = दुष्कृतम् [दुस्/दुर् इति अव्यये]
- अप्रत्ययस्य किम्?
- अग्निः करोति [अग्नि+स् = अग्नि+र् = अग्निः – प्रत्ययस्य विसर्गः]
- वायुः करोति [वायु+स् = वायु+र् = वायुः – प्रत्ययस्य विसर्गः]

- मातृ – षष्ठ्येकवचने
- मातृ + ङस्
- मातृ + अस्
- मातुर् स् ('ऋत उत्'-६.१.१११ इति ऋकार-अकारयोः स्थाने उकारः एकादेशः, स च रपरः )
- मातुर् ('रात्सस्य' ८.२.२४ इति प्रत्ययसकारस्य लोपः)
- मातुः ('खरवसानयोः विसर्जनीयः' ८.३.१५)
- पूर्वान्तवद्भावेन विसर्गः प्रत्ययावयवभिन्नः । तेन 'इदुदुपधस्य...' इति षत्वे प्राप्ते,

# एकादेशशास्त्रनिमित्तकस्य न षत्वम् (वा)

- एकादेशशास्त्रनिमित्तकस्य न षत्वम्, कस्कादिषु भ्रातुष्पुत्रशब्दस्य पाठात् (वा) ।
- कस्कादिषु च (८.३.४८) – एतद्गणपठितेषु इण उत्तरस्य विसर्गस्य षः स्यात्, अन्यस्य सः ।
- यदि 'भ्रातुः पुत्रः' इत्यत्र 'इदुदुपधस्य चाप्रत्ययस्य' इत्येव षत्वसिद्धिः, तर्हि कस्कादिगणे भ्रातुष्पुत्रशब्दस्य पाठः व्यर्थः स्यात् ।
- तेन इह न – मातुः कृपा ।

# मुहुसः प्रतिषेधः (वा)

- 'मुहुस्' इत्यव्ययस्य षत्वं न स्यात् कुप्वोः परयोः ।
- मुहुः + कामा = मुहु⌒कामा / मुहुः कामा ।